International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(6): 104-106
© 2019 IJSR
www.anantaajournal.com
Received: 29-09-2019
Accepted: 30-10-2019

**पियाली मालाकार**
शोधछात्रा, (शिक्षाशास्त्रविभागः)
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत ।

**Corresponding Author:**
**पियाली मालाकार**
शोधछात्रा, (शिक्षाशास्त्रविभागः)
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत ।

# प्रशिक्षणमहाविद्यालये रचनावादिशिक्षकः

**पियाली मालाकार**

**शोधसारः**

**गुरुब्रह्मा गुरुविष्णुर्गुरुर्देवो महेश्वरः ।**
**गुरुस्साक्षात्परं ब्रह्म तस्मै श्री गुरवे नमः ॥**

यतः शिक्षैव समुत्तमनागरिकान् निर्माति । तैश्च राष्ट्रवैभवं प्रगतिश्च सम्पाद्येते । शैक्षिको विकासः आधेयः । तत्र चाधिकरणं भवति शिक्षकसमाजः । अतः ज्ञानसंक्रमणकलायां दक्षतां सम्पादयितुम् अध्यापनकौशलानि ज्ञापयितुं विद्यालय तथा कक्ष्याव्यवहारं शिक्षयितुम्, अधिकारिभिः व्यवहारनैपुण्यं कारयितुं छात्रसर्वाङ्गीणविकासचातुर्यं बोधयितुं सामाजिकावश्यकतानुगुणं छात्रान् निर्मातुं शिक्षकाणां कृते या विशिष्टा व्यवसायिकी शिक्षा दीयते, सा भवति शिक्षकशिक्षा । अतः अस्माभिः समुत्तमैः शिक्षकैः भाव्यम् । एतदर्थं देशे शिक्षकशिक्षायाः विकासाय सर्वकारीयप्रयासाः प्रशंसनीयाः । सम्प्रति देशे शिक्षकशिक्षायै निमित्त प्रशिक्षणस्य व्यवस्था प्रचलन्ती । तस्याः इमानि अधोलिखितानि आवश्यकतानि भवेयुः । यथा –

- शिक्षणे छात्रध्यापकस्य आस्थायाः विश्वासस्य च विकसनम् ।
- छात्राध्यापकानां कक्ष्याशिक्षणाय सम्यग्ज्ञानप्रदानम् ।
- छात्राध्यापकानां विविधशिक्षणकौशलानि अभिज्ञाप्य तेषां सम्यगुपयोगाय प्रशिक्षणदानम् ।
- अध्यापने छात्रस्तरानुगुणविधीनां दृश्यश्रव्योपकरणानां चयनाय उपयोगाय च छात्राध्यापकेषु दक्षतासम्पादनमादि च ।

रचनावादे शिक्षणस्य काश्चन लक्ष्यानि परिदृश्यन्ते यैः शिक्षार्थीणां मानसिकक्षमता बर्द्धयति, तानि –

- रचनावादे छात्राः स्वविचारशक्तेः प्रयोगं कर्त्तुं शक्नुवति ।
- समालोचनात्मिका चिन्तान् कर्त्तुं समर्थः भविष्यति ।
- स्मृत्यौ संरक्षिततथ्यानां पुनः स्मरणं कर्त्तुं शक्नुवति ।
- धीशक्तेः प्रयोगः व्यवहारक्षमतायाः बृद्धिं कर्त्तुं शक्नुवति ।

शिक्षणव्यवस्थायां परिवर्तनं दरीदृश्यते । यतः अहं सर्वे जानीमः अस्माकं शिक्षणव्यवस्था त्रिमुखी प्रक्रिया एव - शिक्षकः, शिक्षार्थी, पाठक्रमश्च । तत्र छात्राः पञ्चदशवर्षयावत् केवलमेव शिक्षकानां पाठं शृण्वन्ति, पाठक्रममायत्तं कुर्वन्ति , तदपि श्रेण्या उत्तीर्णाय नूतनज्ञानायत्तकरणाय पाठं पठन्ति । परन्तु केवलमेव शिक्षकशिक्षणमहाविद्यालये अवकाशः मिलति यत्र छात्रेभ्यः पठनेन सह पाठनस्य सुविधा मिलति । वयं सर्वे जानीमः प्रशिक्षणमहाविद्यालये छात्राणां छात्राध्यापकः नाम्ना अभिधीयन्ते । यत्र छात्रा केवलं न छात्राः, अध्यापकोऽपि । यत्र छात्राः अध्यापकानां भूमिकां पालयन्ति ।

## प्रस्तावना

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**
**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥**

शिक्षते ज्ञायते यया सा शिक्षा । शिक्षा नाम सा भवति यया कश्चित् विषयः वुध्यते, कश्चित् किञ्चित् ज्ञानमधिगच्छति, शिक्षितो वा भवति अज्ञातविषयवस्तुनः परिचयं प्राप्नोतिए तत्तद्विषयेषु ज्ञानवान् भवति । शिक्षा तु अज्ञातविषयाधिगम एव । तत्रापि अध्यापकशिक्षेति किञ्चित् विस्मयं जनयति । शिक्षकस्तु पूर्वमेव शिक्षितो भवति पुनः शिक्षकशिक्षायाः का विशिष्टता ? विशिष्टम् अध्यापनकार्यमिदम्, मानवनिर्माणकार्यमिदम् । अतः सत्यपि शिक्षते शिक्षके पुनरध्यापनविशिष्टशिक्षा काचितपेक्षिता भवति । केवलं ज्ञानमात्रेण न प्रस्तुत व्यवहारेणापि तत्र विशिष्टता स्यात् तत्तदध्यापनविषये प्रावीण्यं स्यात् । एवम् शिक्षकशिक्षा महत्वम् आभजति । अतः अपेक्षिता शिक्षकशिक्षा ।

प्रकृष्टं शिक्षणं प्रशिक्षणम् । प्रशिक्षणे प्राधान्येन कौशलानां विकासः क्रियते । अध्यापकप्रशिक्षणेन प्रशिक्षिताध्यापकः नैपुण्येन पाठयितुं प्रभवति । तस्य अध्यापनं विलक्षणं विशिष्टं प्रभावि च भवितुमर्हति । यदा अध्यापनकौशलानि उपायाः, पद्धतयः

करायन्तीभवति तदा अध्यापनं छात्रानाकर्षति सफलं च भवति । तदैव छात्रेषु विषयाधिगमः शीघ्रं जायते। अतः अपि प्रशिक्षणं महत्वपूर्णम्।

शिक्षकेभ्यः शिक्षा इति व्युत्पत्त्या शिक्षकाणां कृते प्रदीयमाना शिक्षा भवति शिक्षकशिक्षेति विद्वद्वचः । परं शिक्षकाः शिक्षां ददति, शिक्षिताः इति कारणेन । तर्हि तेषां शिक्षितानां कृते पुनः किमर्थं शिक्षा ? इति चेदुच्यते-शिक्षकाः शिक्षणकौशलसम्पन्नाः भवेयुः । न केवलं ज्ञानार्जने अपि तु ज्ञानसङ्क्रमणे ते दक्षाः स्युः ।

श्लिष्टा क्रिया कस्यचिदात्मसंस्था,
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिक्षकाणां,
धुरि प्रतिष्ठापयितव्य एव। (मालाविकाग्निमित्रम्)

**प्रशिक्षणस्यावश्यकता –**

शिक्षकाः न केवलं समुत्तमच्छात्रनिर्मातारः अपितु प्रकारान्तरेण इमे समाजनिर्मातारः राष्ट्रनिर्मातारश्च भवन्ति । विद्यालये भवति मनुष्यनिर्माणस्य शिल्पस्थानम् । यत्र अध्यापकाः बालकस्य शारीरिक-मानसिक-बौद्धिकादि सर्वाङ्गीणविकासान् सम्पाद्य तान् समुत्तमनागरिकरूपेण निर्मान्ति, ते च उत्तमाः नागरिकाः समुत्तमसमाजस्य समुत्तमराष्ट्रस्य निर्माणं संरक्षणं विकासं विदधति । कश्चिच्चिकित्सकः सामान्यं दोषं करोति चेत्कस्यचिदेकस्य रोगिणः प्राणान् नाशयति, परं शिक्षकः सामान्यमपि दोषमाचरति चेत् तेन पाठिताः सहस्रशः छात्राः दुष्पथगामिनः सन्तः अनर्थकानाचरन्ति । एवं विमर्शनं शिक्षकाणाम् उत्तरदायित्वानि स्पष्टयति । अतः अस्माभिः समुत्तमैः शिक्षकैः भाव्यम् । एतदर्थं देशे शिक्षकशिक्षायाः विकासाय सर्वकारीयप्रयासाः प्रशंसनीयाः । सम्प्रति देशे शिक्षकशिक्षायाः विकासाय सर्वकारीयप्रयासाः प्रशंसनीयाः । सम्प्रति देशे शिक्षकशिक्षायै निमित्त प्रशिक्षणस्य आवश्यकता वर्तते ।

स्वतन्त्रभारते शिक्षकशिक्षायाः दार्शनिकव्यवहारिकसिद्धान्तानां भारतीयगौरवसंस्कृत्यनुकुलं निर्माणमपेक्षितम् आसीत् । वैदेशिकाधारणायाः दूरीकरणम् अनिवार्यमासीत् । अतः भारतीयशिक्षाशास्त्रिभिः काचन नूतना शिक्षाव्यवस्था चिन्तिता, तदेव प्रशिक्षणम् । यस्मिन् कस्मिन्नपि विशिष्टकार्ये व्यवसाये च प्रभावीरूपेण कार्यं कर्तुं प्रशिक्षणं अपेक्षते । प्रशिक्षणानन्तरं यदि कश्चिद् व्यवसाये नियुक्त भवति तर्हि सः तदर्थं योग्यो भवति । यः कोऽपि जनः नियुक्ते पूर्वं प्रशिक्षणं प्राप्सति तस्य पूर्वप्रशिक्षणमिति संज्ञा भवति। यदतीव महत्वपूर्णं भवति । यस्य कस्यापि व्यक्तेः विना प्रशिक्षणं यस्मिन् कस्मिन्नपि कार्ये नियुक्तिः क्रियते चेत् हानिकारकं भवति । कोऽपि मनुष्यः यस्मिन् कस्मिन्नपि कार्ये विफलं भवति चेत्, तस्य कार्यविशेषस्य विषये तस्य मनसि प्रतिकुलभावना उत्पद्यते । प्रशिश्रक्षणेन स्वकार्ये सफलतां प्राप्नोति, सन्तुष्टः च भवति।

केचन जनाः अध्यापकाय प्रशिक्षणस्य आवश्यकता नास्ति, तस्य केवलं पाठ्यनिर्मानविषये नैपूण्यप्राप्तिरेव आवश्यकी इति च कथयन्ति । प्रशिक्षिताप्रशिक्षिताध्यापकयोर्मध्ये कोऽपि सार्थकः भेदः न दृश्यते इति तेषां वादः । एतत् न सत्यम् । प्रत्येकशिक्षकाय प्रशिक्षणमत्यन्तमावश्यकम् । प्रशिक्षिताप्रशिक्षिताध्यापकयोः तुलनायां प्रशिक्षिताध्यापकः अप्रशिक्षितस्य अपेक्षया अत्यधिकप्रभावशाली भवति । शिक्षणं नाम केवलं कथनं विषयवस्तुनः ज्ञानप्रदानं वा न भवति।

बहुभिः आयोगैः प्राथमिकमाध्यमिकविद्यालयानामध्यापकानां प्रशिक्षणविषये स्वीयपरामर्शाः प्रदत्ताः। सम्प्रत्यपि प्राथमिक-प्राथमिकोन्नतपाठशालानामध्यापकेभ्यः प्रशिक्षणमावश्यकमिति निर्धारितमस्ति । सर्वे शिक्षकाः प्रशिक्षिताः भवेयुः । तैः अवश्यम् अध्यापनकला अध्येतव्या । अत्यधिकाध्यापकाः प्रशिक्षणानुभवानामाधारेण एव शिक्षणे महारथाः अभवन्। प्रशिक्षणस्य उद्देश्यं केवलं व्यवसायिकप्रबिधिनां शिक्षणं यावत् सीमितं न भवति । बहवः शिक्षकप्रशिक्षणसंस्थाः मानवतादृष्ट्या प्रशिक्षितः शिक्षकानामुत्पादनं कुर्वन्ति । ताः नवयुवकानामाकाङ्क्षानुगुणं कार्यं न कुर्वन्ति।

**रचनावादिशिक्षकस्य स्वरूपम् –**

शिक्षार्थिनः यया अभिज्ञतया श्रेणीकक्षे अनन्यसौधनिर्माणं कुर्वन्ति तदेव रचनावादः। शिक्षार्थिनः स्वविचारवुद्ध्या मननस्य च उपरि भित्तिं कृत्वा विश्वजगत्सम्वद्धिः यत् विषयं ज्ञातुं शक्नोति तदेव शिक्षामनोविज्ञाने रचनावादः । रचनावाद (Constructivism) भवति छात्र स्वीय वातावरणेन सह कामपि अन्तक्रिया कुर्वन् स्वस्य अनुभवानां माध्यमेन स्वस्य ज्ञानस्य रचना स्वयमेव करोति । रचनावादस्य स्वाभाविक सिद्धान्तं भवति बालकः स्वाभाविकतया स्वयम् अन्यैः सह तोलनं कृत्वा पश्यति येन तस्य अवगमनक्षमता विकाशशीला भवति । अनुभवाश्च प्राप्यन्ते, अनुभवानाम आधारेण जीवनयापयितुं शक्नोति। अतः संस्कृतविषयस्य मूल्याङ्कने रचनावादस्य भूमिका वर्त्तते । शिक्षामनोविज्ञाने शिक्षार्थिणां व्यक्तिगतस्वातन्त्रं गुरुत्वं दीयते । व्यक्तिगतस्वातन्त्र्यम् इति कथनेन शिक्षार्थिणां शिक्षणे आग्रहः, एकाग्रता, प्रवणता, मनोभावः प्रेषणा प्रभृतयः बुध्यते। इमानि भिन्नशिक्षार्थिणां क्षेत्रे भिन्नानि। सार्थकशिक्षणाय शिक्षकेण अस्योपरि गुरुत्वं दातव्यम् । प्राचीनशिक्षाव्यवस्थायां शिक्षकस्य गुरुत्वं मुख्यं, छात्रस्य भूमिका गौणम् आसीत् । परन्तु आधुनिकमनोविज्ञाने शिक्षा शिक्षार्थीकेन्द्रिता। शिक्षार्थिणां उपरि ध्यानं शिक्षार्थीणां सहायताकरणे च शिक्षकस्य मुख्यभूमिका भवति । शिक्षार्थी यदा प्रकृतिं ज्ञातुं शक्नोति तदा सः स्वयमेव तस्य कौतुहलं निवृत्तिं कर्तुमपि शक्नोति। प्रयोजनानुसारे शिक्षकः तेषां सहायता करिष्यति । पियाजे, डिवी, एडमण्डहासेरलः, भाइगटस्किः, जोसेफ नोभाकः च प्रभृति महोदयाः रचनावादस्योपरि गुरुत्वपूर्णमवदानं प्रयच्छन्ति। प्राचीनकाले शिक्षकः गुरुः इति उच्यते। वैदिकयुगे गुरोः गौरवम् आसीत्। गौरवमिदं विविधैः सन्दर्भे गीतं वर्तते । गुरुस्तु त्रिदेवः तथा च परमब्रह्ममयः आसीदिति प्रसिद्धमेव –

गुरुब्रह्मा गुरुर्विष्णुः गुरुदेवो महेश्वरः।
गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः॥

गुरुस्तु शिक्षकस्य समानपदम्। अतीव प्रचलितमासीत् पदमिव प्राचीनकाले। 'गिरति अज्ञानान्धाकारम् इति गुरुः' अनया व्युत्पत्त्या ये स्वोपदेशैः शिष्यस्य अज्ञानान्धकारम् नाशयन्ति स्म।

शिक्षकाः शिष्याणामादरभाजा भवन्ति स्म । ते तु मातृपितृसमाः शिष्याणां कृते आसन्। 'शिष्य कदापि न दुह्येत्' इत्याख्यः महाभारतेऽपि प्रकटितो वर्तते। तद्यथा –

स आवृणोत्यमृतं संप्रयच्छन् तस्मै न दुह्येत् कृतमस्य ज्ञानम्।
गुरुं शिष्यो नित्यमभिवादयति स्वाध्यायमिच्छेच्चे सदाऽप्रमत्तः॥
(उद्योगपर्वम्, महाभारतम्)

परन्तु आधुनिककाले शिक्षाव्यवस्थायां शिक्षा शिशुकेन्द्रिकी। शिक्षार्थीणां भूमिका मुख्यैव भवति। आधुनिकशिक्षाव्यवस्थायां शिक्षकः मित्रं, दार्शनिकः, पथप्रदर्शकश्च रुपेण मन्यते।

स्वामीविवेकानन्दमहोदयः शिक्षायाः विभिन्नस्वरुपम् उदघाटयति स्म। तेषां विभिन्न मतं निम्ने प्रदत्तम् । तेषां मते – मनुष्ये यत् पूर्णत्वं प्रागेव तिष्ठति, तदेव प्रकाशसाधनमेव शिक्षा। अतः उपदेष्टायाःकर्तव्यं भवति मार्गात् विघ्नापसरणम्।

विवेकानन्दमहोदयाः शिक्षायां रचनावादस्योपरि अगाधविश्वासं स्थापयति स्म। तेषां मतानुसारं शिक्षायां मुख्यमाधारं भवति शिशु अर्थात् शिक्षार्थी। शिक्षार्थीभ्यः शिक्षां प्रदातुं तान् प्रति असीमविश्वासः कर्तव्यम्, प्रत्येकं शिक्षार्थी अनन्त ईश्वरीयशक्तेः आधारः, अस्माभिः तेषां मध्ये स्थितः तद् सुप्तब्रह्मणः जागरणस्य चेष्टा करणीयम्। शिशुनां शिक्षादानसमये एतत् स्मरणीयं, यत् तेऽपि स्वयमेव चिन्ता कर्त्तुं शक्नुवन्ति, अतः तद् विषये तेषाम् उत्साह वर्धनीयम्। यदि एवं प्रकारेण छात्रेभ्यः शिक्षां दातुं शक्नुमः तर्हि ते प्रकृत शिक्षितमनुष्यः भवितुमर्हति जीवनसंग्रामे आत्मनः समस्यासमाधानं कर्त्तुं शक्नुवन्ति च।

ते अवदत् – कोऽपि कमपि शिक्षयितुं न शक्नुवन्ति । 'शिक्षयिति' एवमेव मननं कृत्वा शिक्षकः सर्वोऽपि नष्टं करोति। वेदान्ते प्रकटितम् – मनुष्याणां मध्ये सर्वमपि वर्तते। एकस्मिना बालकेऽपि सर्वमस्ति। तेषां जागरणं शिक्षकस्य कार्यम्। यस्मिन् प्रकारे शिक्षार्थिनः तेषां आत्मनः हस्तयोः, पादयोः, नासिकायाः, कर्णयोः, मुखस्य,

अक्ष्णोः च व्यवहारं कृत्वा स्वकीयां बुद्धिमुपयुज्य सक्षमः भविष्यति, शिक्षकेन केवलमेव तद् कार्यं कर्तव्यम् येन सर्वमेव सरलं भविष्यति।

शिक्षकः केवलमेव मार्गात् समस्यामापसारयिष्यति। सर्वेषां विश्वासवर्द्धनं करोति। असमर्थाणां सामर्थं विकाशयति, छात्राणामुन्नतिं साधयति। परन्तु विपरीतमेतत् छात्राणामपकारसाधनं तेन न ग्राह्यम्। केवलं सैव योग्यशिक्षकः यः प्रशिक्षणं प्राप्य स्वकीय विपरिणमनं समर्थरुपेण शुद्धरुपेण च कर्त्तुं प्रभवति। आत्मनः शक्तेः शिष्याणां मध्ये सञ्चारणं कृत्वा तेषां माध्यमेन सर्वं पश्यति। तेषां कर्णेन शृणोति, तेषां मननेन बोधयति च। ईदृशं शिक्षकः आचार्यो वा प्रकृतशिक्षा दातुं शक्नोति, न अन्यः कोऽपि। ये केवलमेव अन्यस्य भावं विनाशं कर्त्तुं चेष्टयन्ति , ते कदापि कस्याप्युपकारं कर्त्तुं न शक्नुवति।

इतोऽपि रचनावादे शिक्षणस्य काश्चन लक्ष्यानि परिदृश्यन्ते यैः शिक्षार्थीणां मानसिकक्षमता बर्द्धयति, तानि –

- रचनावादे छात्राः स्वविचारशक्तेः प्रयोगं कर्त्तुं शक्नुवति।
- समालोचनात्मिका चिन्तान् कर्त्तुं समर्थः भविष्यति।
- स्मृत्यौ संरक्षिततथ्यानां पुनः स्मरणं कर्त्तुं शक्नुवति।
- धीशक्तेः प्रयोगः व्यवहारक्षमतायाः बृद्धिं कर्त्तुं शक्नुवति।

## प्रशिक्षणमहाविद्यालये रचनावादिशिक्षकानां कार्यम्

एतद् भिन्नं रचनावादिशिक्षकस्य काश्चन् प्रधान भूमिका दृश्यते। एतदर्थं प्रशिक्षकमहाविद्यालये निम्नोक्त विन्दुनामुपरि ध्यानं प्रदातव्यम्, तानि निम्ने उल्लिखितं वर्तते –

शिक्षणव्यवस्थायां परिवर्तनं दरीदृश्यते। यतः अहं सर्वे जानीमः अस्माकं शिक्षणव्यवस्था त्रिमुखी प्रक्रिया एव - शिक्षकः, शिक्षार्थी, पाठक्रमश्च। तत्र छात्राः पञ्चदशवर्षयावत् केवलमेव शिक्षकानां पाठं शृण्वन्ति, पाठक्रममायत्तं कुर्वन्ति, तदपि श्रेण्या उत्तीर्णाय नूतनज्ञानायत्तकरणाय पाठं पठन्ति। परन्तु केवलमेव शिक्षकशिक्षणमहाविद्यालये अवकाशः मिलति यत्र छात्रेभ्यः पठनेन सह पाठनस्य सुविधा मिलति। वयं सर्वे जानीमः प्रशिक्षणमहाविद्यालये छात्राणां छात्राध्यापकः नाम्ना अभिधीयन्ते। यत्र छात्रा केवलं न छात्राः, अध्यापकोऽपि। यत्र छात्राः अध्यापकानां भूमिकां पालयन्ति।

अतः प्रशिक्षणमहाविद्यालये शिक्षकाणां कार्यं भवति केवलमेव रचनावादस्य व्यवहारः। रचनावादीशिक्षणः शिक्षणतत्त्वस्योपरि भित्तिं कृत्वा प्रचलति। येन तत्त्वेन छात्राणां व्यवहारिककार्यं वुध्यते। शिक्षण सर्वदा छात्राणां ज्ञानस्योपरि भित्तिं कृत्वा संगठित भवति। यत् ज्ञानं स्किमा इति उच्यते। अर्थात् छात्राणाम् एतावत् पर्यन्तं तेषां शिक्षणप्रक्रियायां यत् स्किमा सन्ति तत् व्यवहारिकरुपेण प्रयोगमेव रचनावादः इति कथ्यते। अतः छात्राः कथं तेषां ज्ञानं प्रयोगं कर्त्तुं शक्नुवन्ति तद् सहायतार्थं शिक्षककेवलमेव मार्गदर्शकस्य भूमिका पालयति।

एतद् भिन्नं रचनावादिशिक्षकस्य काश्चन् प्रधान भूमिका दृश्यते। तानि निम्ने उल्लिखितं वर्तन्ते –

प्रशिक्षणमहाविद्यालये यदि शिक्षकः शिक्षार्थीनां समीपे वर्तमानसमस्यां तात्पर्यपूर्णं कर्त्तुं शक्नोति तर्हि तेषां कृते विषयमाग्रहसञ्चारकारी भवति। शिक्षकः शिक्षार्थीभ्यः प्रयोजनानुयायी अवकाशः प्रददाति, यतः ते समस्यां सुष्ठुरुपेण वोधयितुं शक्नुवति। यदि प्रशिक्षणमहाविद्यालये शिक्षार्थीभ्यः अधिकाधिकाः दातुं शक्नुवति भवितुं शक्नोति। शिक्षकः शिक्षार्थीभ्यः वक्तव्यं प्रति यदि अधिकगुरुत्वं ददाति चेत तर्हि तेषां बोधिकविकाशः वर्धयन्ति।

## निष्कर्ष

यतः प्रशिक्षणमहाविद्यालये सर्वेषां छात्राणां कृते रचनावादीशिक्षणमाध्यमेन गतानुगतिकपाठ्यक्रमानुगुनं व्यवहारिककार्यक्रमेण अधिककार्यकारी भवति तदर्थं छात्राः व्यवहारिककार्ये निपुणः भविष्यन्ति। छात्राणां मानसिकगुणं वर्द्धयन्ति। ते पाठे अधिक मनोनिवेशः कर्त्तुं शक्नुवन्ति। छात्राणां चारित्रिकविकाशः भवन्ति। तेषां सुप्तप्रतिभायाः प्रकाशयन्ति। अतः रचनावादीशिक्षणं शिक्षणप्रशिक्षणमहाविद्यालये अधिककार्यकारी फलप्रसुः च भवति।

## संदर्भ


1. प्राथमिक शिक्षकशिक्षणे शिशुशिक्षा – डॉ देवाशिस पाल, रीता पावलिकेशन – 25 वि वेनियाटोल लेन, कोलकाता – 09
2. अध्यापकशिक्षा – डॉ प्रह्लाद रा. जोशी – राष्ट्रियसंस्कृतविद्यापीठम् , तिरुपति, 2007
3. शिक्षायाः मानवाधिकारः – डॉ स्नेहलता मिश्र
4. आमार भारत, अमर भारत – रामकृष्णमिशन
5. https://en.m.wikipedia.org